दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
अद्य वि.सं. २०८३,
कलियुगाब्धः ५१२७ बसन्त-ऋतुः
सूर्यः उत्तरायणम् चैत्रशुक्लपूर्णिमा
चैत्र 19 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-160 | 1 | अप्रैल 02, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com



2 हिमाचलप्रदेशे सहस्रशः अनुबन्धकर्मिणां दैनिकवेतनभोगिनां च कृते नियमितीकरणस्य उपहारः

3 संस्कृतविद्यालय- महाविद्यालय-शिक्षकसंघस्य उत्तराखण्डस्य निर्वाचनं सम्पन्नम्, डॉ. रामभूषण बिजल्वाण तृतीयवारं प्रदेशाध्यक्षः निर्वाचितः

4 जनगणना-२०२७: राष्ट्रपति-उपराष्ट्रपतिभ्यां 'स्व-गणना' उपक्रमस्य शुभारम्भः


## सुभाषितम्

**इन्द्रियं विजितं येन, तेनैव भुवनं जितम्।
यश्चेन्द्रियैः पराभूतः, स सर्वत्र पराजितः।।**

भावार्थः- जिस व्यक्ति ने अपनी इन्द्रियों पर विजय प्राप्त कर ली उसने सारे संसार पर विजय प्राप्त कर ली है और यदि कोई व्यक्ति अपनी इन्द्रियों से पराजित हो जाता है तो वह जीवन के हर क्षेत्र में पराजित हो जाता है।

## पश्चिम-एशिया-सङ्घर्षस्य प्रभावेण तैल-विपणिभिः वाणिज्य-एल.पी.जी. मूल्ये पंचदशोत्तरैकशततोप्यधिक रूप्यकाणां वृद्धिः कृता




पश्चिम-एशिया-सङ्घर्षस्य प्रभावेण तैल-विपणिभिः वाणिज्य-एल.पी.जी. मूल्ये पंचदशोत्तरैकशततोप्यधिक रूप्यकाणां वृद्धिः कृता। 'इण्डियन ऑयल' मन्त्रालयस्य सूचनानुसारं, नवदेहल्यां एकादश किलोग्राम-परिमितस्य वाणिज्य-कोषस्य मूल्यम् अधुना अष्टोत्तरद्विशताधिक द्विसहस्ररूप्यकाणि अभवत्। एवमेव कोलकाता-नगरे अष्टाधिकद्विशतोत्तर द्विसहस्ररूप्यकाणि, मुम्बई-नगरे एकत्रिंशदधिक द्विसहस्ररूप्यकाणि तथा च चेन्नै नगरे प्रायः त्रिसहस्ररूप्यकाणि निर्धारितम्। एते नूतनाः नियमाः गतदिवसात् प्रभाविनः सन्ति। उल्लेखनीयं यत् गार्हस्थ्य-एल.पी.जी. कोषाणां मूल्ये किमपि परिवर्तनं न कृतम्। सर्वकारेण स्पष्टीकृतं यत् उद्योगेषु उपयुज्यमानानां वाणिज्य-कोषाणां मूल्यं 'विपणन-आधारितं भवति, यस्य समीक्षा प्रतिमासं क्रियते।

## सर्वकारेण आश्वासितं यत् सम्पूर्ण देशे सर्वाणि सस्यबीजानि पर्याप्त मात्रायाम् उपलभ्यन्ते

नवदेहल्यां 'पश्चिम-एशिया-सङ्घर्षस्य' प्रभावानां समीक्षां कुर्वन् भारत-सर्वकारेण सुदृढाश्वासनं दत्तम्। कृषि मन्त्रालयस्य अवर सचिवा डॉ. मनिन्दर कौर द्विवेदि उक्तवती यत् देशे सर्वेषां सस्यानां बीजानि पर्याप्तरूपेण उपलब्धानि सन्ति। तया सूचितं यत् पंचाशीत्यधिकैकशत लक्ष-क्विण्टल् परिमितानि खरीफ-शस्य-बीजानि तथा च खरीफ-ऋतौ आवश्यकस्य उर्वरकस्य भागः 'ओपनिंग स्टॉक' इति रूपेण सञ्चितः अस्ति।

## लोकसभायाम् अश्विनी वैष्णवस्य सम्बोधनम्

लोकसभायां प्रश्नकाल-समये पूरक प्रश्नानां उत्तरं यच्छन् रेलमन्त्री अश्विनी वैष्णवः अवदत् यत् रेल-विभागाय अस्मिन् वर्षे 'अंकीय आयं' आवंटितम्। अनेन देशस्य प्रत्येकः नागरिकः, विशेषतः निर्धनाः मध्यमवर्गीय-जनाः च लाभान्विताः भविष्यन्ति। मन्त्रिणा स्पष्टीकृतं यत् विगत दशके रेल-क्षेत्रे कृतेन बृहत् निवेशेन देशस्य रेल-जालस्य आधुनिकीकरणं जातं, यस्य प्रत्यक्ष-लाभः सामान्य जनानां यात्रा-सुविधासु दृश्यते।

## वस्तु-सेवा-कर-सङ्ग्रहः अष्ट दशमलवोत्तर अष्ट प्रतिशतं यावत् वृद्धिं प्राप्य मार्चमासे द्विलक्षकोटिरूप्यकाणि अतिक्रमितः, षड्विंशत्यधिक द्विसहस्रतमे वित्तवर्षे त्रीणि दशमलवोत्तर अष्ट प्रतिशतं यावत् वृद्धिमवाप्नोत्




अस्मिन् वर्षे मार्च-मासे वस्तु-सेवा करस्य आहत्य सङ्ग्रहः गतवर्षस्य तुलनया अष्ट दशांश अष्ट प्रतिशतं वर्धित्वा द्वि-लक्ष-कोटि-रूप्यकाणाम् स्तरम् अधिगतम् । गतवर्षे मार्च-मासे एषः सङ्ग्रहः एक दशांश अष्ट त्रिणी लक्ष-कोटि-रूप्यकाणि आसीत्। अपरपक्षे, कृत्स्ने वित्तीय-वर्षे आहत्य-राजस्वं द्वाविंशति लक्ष-कोटि-रूप्यकाणि प्राप्तम्, यत् गतवर्षस्य तुलनायाम् अष्ट दशांश त्रिणी प्रतिशतं अधिकम् अस्ति। एषा वृद्धिः भारतीय अर्थव्यवस्थायाः सुदृढतां कर-अनुपालनस्य विकासं च दर्शयति।

## असम-राज्ये विधानसभा-निर्वाचनस्य प्रचारः तीव्रः अभवत्



प्रधानमन्त्री तथा भाजपेति दलस्य वरिष्ठः नेता नरेन्द्रमोदी अवदत् यत् निर्धनानां मध्यमवर्गस्य च कल्याणमेव दलस्य सर्वोच्चप्राथमिकता अस्ति। असम-राज्यस्य गोगामुख-नगरे निर्वाचनसमारोहं सम्बोधयन् प्रधानमन्त्री अवदत् यत् सर्वसमावेशक-विकासाय भाजपेति दलम् अवसंरचनाक्षेत्रे, शिक्षायाम्, स्वास्थ्यसेवायां च निरन्तरं अवधानं प्रदत्तवान् । श्रीमोदी अवदत् यत् असम-राज्ये एन्. डी. ए-शासनस्य गतदशवर्षेषु राज्ये महती प्रगतिः अभवत्। सः अग्रे अवदत् यत् "डबल्-इञ्जिन्" सर्वकारः राज्ये चिरस्थायी शान्तिं आनेतुं साहाय्यं कृतवान्, बहवः युवकाः हिंसातः अधिकसुरक्षितं भविष्यं प्रति गच्छन्तः सन्ति। असम-राज्यं चायेत्यस्य कृते जगति प्रसिद्धम् अस्ति इति प्रधानमन्त्री अवदत्, अपि च मोरिगांव-नगरे आगामिनः सेमिकण्डक्टर्-प्लाण्ट् इत्यनेन सह राज्यं शीघ्रमेव सेमिकण्डक्टर्-चिप्स् इत्यस्य कृते ज्ञायते।

## संविधान-सदनस्य अष्टपञ्चाशत् भित्तिचित्राणि केवलं कलाकृतयः न सन्ति, तानि भारतस्य सभ्यता-यात्रां प्रदर्शयन्ति - उपराष्ट्रपतिः

उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः अवदत् यत् संविधान-सदनस्य अष्टपञ्चाशत् भित्तिचित्राणि केवलं कलाकृतयः न सन्ति, तानि भारतस्य सभ्यता-यात्रां प्रदर्शयन्ति। श्रीराधाकृष्णन् वर्यः नवदेहली-नगरे राज्यसभायाः सदस्या सुधा मूर्तिना लिखितस्य पुस्तकस्य, टाईड्स् आफ् टाइम् इत्यस्य विमोचनं कुर्वन् एतत् उक्तवान्। राधाकृष्णन् वर्यः अवदत् यत् लोकतन्त्रं प्रायः आधुनिक-व्यवस्थारूपेण दृश्यते यत् पश्चिमदेशात् आगतम्। सः अवदत् यत् भारतस्य प्राचीनाः ग्रन्थाः स्पष्टतया साक्ष्यं ददति यत् देशे लोकतन्त्रस्य परिकल्पना नूतना नास्ति।

## राज्यसभायां केन्द्रीय-सशस्त्र-आरक्षक-बल-विधेयकः स्वीकृतः



राज्यसभया 'केन्द्रीय-सशस्त्र-आरक्षक-बल-विधेयकं ध्वनि-मतेन पारितम्। गृह-राज्यमन्त्री नित्यानन्द रायः गतसप्ताहे एतत् विधेयकं प्रस्तुतवान्, यस्य मुख्य उद्देश्यं 'ग्रुप-ए' सामान्य-कर्तव्य-अधिकारिणां नियुक्ति-सेवा-अनुशंसानां च नियमनं करणीयम् अस्ति।


हिमसंस्कृतवार्ता:
हिमसंस्कृतवार्तापत्रस्य
एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य समुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्


## नूतन-वित्तीय वर्षात् देशे अनेके महत्त्वपूर्णाः आर्थिकपरिष्काराः प्रवृत्ताः

नूतन-वित्तीय वर्षात् देशे अनेके महत्त्वपूर्णाः आर्थिकपरिष्काराः प्रवृत्ताः। षड्-दशकेभ्यः पुरातनस्य 'आयकर-अधिनियमस्य' स्थाने अद्यतनः पंचविंशत्युत्तरद्विसहस्र-तमवर्षस्य नूतन-आयकर-अधिनियमः प्रवृत्तो जातः । अस्य मुख्य उद्देश्यं कर-प्रणाल्याः सरलीकरणं, पुरातन-नियमानां निष्कासनं तथा च करदातृणां कृते अनुपालनं सुगमं करणम् अस्ति। भारतीय-रिजर्व-बैंक इत्यस्य निर्देशानुसारं सर्वेभ्यः 'डिजिटल' व्यवहारेभ्यः 'द्वि-स्तरीय-प्रमाणीकरणम्' अनिवार्यं भविष्यति। अपि च, 'फास्टैग' वार्षिक शुल्कस्य नूतनाः नियमाः तथा च 'पैन-कार्ड' निर्माणस्य अद्यतनीकरणस्य च परिष्कृताः नियमाः अपि नूतन-वित्तीय वर्षात् कार्यान्वितम् अभवन्।

# हिमाचलप्रदेशे सहस्रशः अनुबन्धकर्मिणां

## दैनिकवेतनभोगिनां च कृते नियमितीकरणस्य उपहारः



**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशसर्वकारेण अनुबन्धकर्मिणां, दैनिक-आकस्मिक- वेतनभोगिनां कृते नियमितीकरणस्य उपहारः प्रदत्तः। अस्मिन् विषये बुधवासरे कार्मिकविभागेन अधिसूचना निर्गता। अधिसूचनानुसारं तेषां सेवानां नियमितीकरणं भविष्यति येषां विवरणम् अधः दत्तम् अस्ति।

**१. अनुबन्धकर्मिणां कृते नियमाः**

• समयसीमा- ये अनुबन्धकर्मिणः ३१ मार्च २०२६ पर्यन्तं वर्षद्वयस्य (२ वर्ष) निरन्तरसेवां पूर्णां कृतवन्तः, ते नियमितीकरणस्य पात्राः भविष्यन्ति।
• आगामी अवसरः- येषां द्विवर्षीयसेवा ३० सितम्बर २०२६ पर्यन्तं पूर्णा भविष्यति, तेषामपि तदनन्तरं नियमितीकरणं भविष्यति।
• नियमितीकरणं रिक्तपदानाम् उपलब्धतायां तथा वरिष्ठतायाः आधारेण भविष्यति।
• कर्मचारी शारीरिकरूपेण स्वस्थः भवेत्।
• चरित्रसत्यापनं तथा जन्मतिथिप्रमाणम् अनिवार्यं भविष्यति।
• नियमितीकरणानन्तरं ते 'टाइम स्केल' इत्यस्य न्यूनतमवेतनं प्राप्स्यन्ति, राज्ये कुत्रापि नियुक्तिः भवितुं शक्नोति।

**२. दैनिक-आकस्मिकवेतनभोगिनां कृते नियमाः-**

• समयसीमा- येषां ४ वर्षाणां निरन्तरसेवा (प्रतिवर्षं न्यूनतम् २४० दिनानि) ३१ मार्च २०२६ पर्यन्तं पूर्णा अस्ति, ते नियमितीकर्तुं शक्यन्ते।
• आगामी अवसरः- ३० सितम्बर २०२६ पर्यन्तं चतुर्वर्षीयसेवां पूर्णां कुर्वतां कर्मिणामपि तदनन्तरं विचारः भविष्यति।

**• विशेषानियमाः-**

• नियमितीकरणाय किमपि नूतनं पदं न सृजितं भविष्यति। नियमितीकरणानन्तरं पूर्वतनं दैनिकवेतनभोगिपदं समाप्तं भविष्यति।
• इदं प्रक्रिया विभागस्य आबंटित-बजटस्य उपलब्धतायाः अधीना अस्ति।
• न्यूनतमशैक्षणिकयोग्यता अनिवार्या अस्ति, परन्तु सक्षमाधिकारिणः अनुमतिना अत्र शिथिलता (Relaxation) दातुं शक्यते।
• आयुसीमा- यदि कश्चन नियुक्तिसमये आयुसीमायाम् आसीत्, परन्तु इदानीं तां पारं कृतवान्, तर्हि सः अपि पात्रः भविष्यति।
• पदोन्नति नियमः- यदि कश्चन उच्चवेतनयुक्ते पदे ४ वर्षात् न्यूनं कार्यं कृतवान्, तर्हि तस्य नियमितीकरणं न्यूनपदे एव भविष्यति।

**प्रशासनिकनिर्देशाः-**

कार्मिकविभागेन सर्वेषां प्रशासनिकसचिवानां, विभागाध्यक्षाणां, मण्डलायुक्तानां च कृते एतेषां नियमानां कठोरतया पालनं कर्तुं तथा स्क्रीनिंग-समित्याः गठनं कर्तुं निर्देशाः दत्ताः सन्ति। नियमितीकरणं आदेशनिर्गमनस्य तिथितः एव प्रभावी भविष्यति।

# 'आउटसोर्स' कर्मचारिणां नियमितीकरणाय न कापि स्थायिनीतिः, सदने अवदत् मुख्यमन्त्री सुखविन्दरसिंहः सुक्खुः



**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशसर्वकारेण बुधवासरे विधानसभायां स्पष्टीकृतं यत् 'आउटसोर्स' (बाह्याधारेण नियुक्त) कर्मचारिणां सेवानां नियमितीकरणाय सम्प्रति काऽपि स्थायिनीतिः नास्ति। विधायकस्य प्रकाशराणा महोदयस्य, डॉ. जनकराजस्य च लिखितप्रश्नस्य उत्तरे मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् राज्यसर्वकारः नियमित- अनुबन्ध- कर्मचारिणां वेतनवृत्तिषु प्रतिमासं प्रायः १,१७२ कोटि-रूप्यकाणि व्ययं करोति। अस्य तुलनायां 'आउटसोर्स' कर्मचारिणां व्ययः अतीव न्यूनः अस्ति। अस्मिन् मद (Head) मध्ये सर्वकारः प्रतिमासं प्रायः १९ कोटि-रूप्यकाणि व्ययति। सर्वकारेण सदने सूचितं यत् विभिन्नविभागेषु प्रायः १३,००० कर्मचारिणः 'आउटसोर्स' आधारेण कार्यरताः सन्ति।

### राजकोषे राज्यस्य राजकोषे पेन्शन-भोगिनां भारः

राज्यस्य राजकोषे पेन्शन-भोगिनां भारः अपि अधिकः वर्तते। वित्तवर्षे २०२४-२५ मध्ये पेन्शन- भोगिभ्यः आहत्य १०,५३६ कोटि-रूप्यकाणां भुक्तिः कृता। अधिकारिभिः स्पष्टीकृतं यत् पेन्शन- सम्बन्धिनः अङ्काः कोषागार-अकाउण्ट-सङ्घटनेन रक्ष्यन्ते, अत्र विभागानुसारं वा श्रेणीनुसारं किमपि पृथक् वर्गीकरणं न भवति। सर्वकारेण पुनः स्पष्टीकृतं यत् नियमित-पदानि 'आउटसोर्सिङ्ग' माध्यमेन न पूर्यन्ते। केचन सेवाः 'हिमाचलप्रदेश वित्तीय नियम-२००९' इत्यस्य टेंडर-प्रक्रियानुसारं 'आउटसोर्स' कृताः सन्ति। १ जुलाई २०१७ तथा १८ जनवरी २०२१ दिनाङ्कयोः निर्गतानुसारं सेवाप्रदाता- संस्थाभिः प्रत्येकं मासस्य ७ दिनाङ्कपर्यन्तं कर्मचारिणां वेतनं दातव्यं भवति। 'आउटसोर्स' कर्मचारिणः 'राजकीय-कर्मचारिणः' (Government Employees) न मन्यन्ते। अतः तेभ्यः दीर्घकालिक-कार्य-सुरक्षां दातुं वा काऽपि स्थायिनीतिं निर्मातुं सम्प्रति कश्चन प्रस्तावः नास्ति। सर्वकारानुसारं नियमानां प्रयोगात् परं वेतन- विलम्बस्य कश्चन अपि प्रकरणः सर्वकारस्य संज्ञानं न प्राप्तवान्। "वयं राजकोषस्य स्थितेः आधारेण निर्णयं कुर्मः, सम्प्रति 'आउटसोर्स' जनानां कृते काऽपि पृथक् नीतिः विचाराधीना नास्ति।"

**-सुखविन्दरसिंहसुक्खुः, मुख्यमन्त्री**

# HP Vidhansabha Session- 'उन्नयनी' अथवा 'स्वचालितसोपनानि' इत्येतेषां स्थापनात् पूर्वं स्वीकरणीया भविष्यति सर्वकारस्य अनुमतिः; विधानसभायां विधेयकम् उपस्थापितम्




**हिमसंस्कृतवार्ताः- शिमला।**
हिमाचलप्रदेशसर्वकारेण सुरक्षामानदण्डान् कठोरतया प्रयोक्तुं बुधवासरे विधानसभायां 'हिमाचलप्रदेश उन्नयनी (लिफ्ट संशोधनम्) विधेयक- २०२६' उपस्थापितम्। नगरविकासमन्त्री विक्रमादित्यसिंहः एतत् विधेयकं सदने प्रस्तुतवान्, यस्य उपरि शुक्रवासरे बजट-सत्रस्य अन्तिमदिने चर्चा भविष्यति तथा तस्य पारितस्य सम्भावना अस्ति। एतत् विधेयकं राज्ये उन्नयनी (Lifts), स्वचालितसोपानानि (Escalators), तथा चलपथः (Travelators) इत्येतेषां वर्धमानं प्रयोगं नियन्त्रयितुम् आनीतं वर्तते। अस्य मुख्योद्देश्यं २००७ तमस्य वर्षस्य वर्तमान-अधिनियमस्य व्याप्तिं वर्धयितुं अस्ति, येन एस्केलेटर-ट्रैवलेटर इत्येतौ अपि नियामक-संरचनायां (Regulatory Framework) सम्मिलितौ भवेताम्।

## कठोर- प्रशासनिक- नियन्त्रणम् अनिवार्य- निरीक्षणञ्च

राज्यस्य नगरक्षेत्रेषु पर्यटनस्थलेषु च एतेषां यन्त्राणां तीव्रगत्या उपयोगं दृष्ट्वा एतत् पदं स्वीकृतम्। अस्मिन् विधेयके केचन प्रमुखाः अंशाः सन्ति यत्र उन्नयनी स्वचालितसोपानानि (लिफ्ट, एस्केलेटर वा) च स्थापयितुं पूर्वं सर्वकारस्य अनुमतिः अनिवार्या अस्ति। अस्य कृते यन्त्रस्य क्षमता, गतिः, संरचनात्मक-सुरक्षा-मानदण्डाः च इति विषयिणी विस्तृता तान्त्रिकी सूचना दातव्या भविष्यति। नियुक्त-निरीक्षकेभ्यः परिसरे प्रवेशस्य, परीक्षणस्य, सुरक्षा-मानदण्डानां उल्लङ्घने यन्त्र- सञ्चालन-स्थगनस्य च अधिकारः दत्तः। प्रतिवर्षं अनिवार्यरूपेण यन्त्राणां निरीक्षणं करणीयम्। तृतीया-पक्ष-बीमा उपभोक्तृणां सुरक्षां निश्चितं कर्तुं बीमा-कवरेज (Insurance) अनिवार्यं कृतम्।

### दण्ड-विधानं यन्त्राणां आयुः च

विधेयके नियमानां उल्लङ्घने कठोर-दण्डस्य प्रावधानं वर्तते। वैध-अनुज्ञप्तिं (License) विना सञ्चालने ५०,००० रूप्यकाणि पर्यन्तं दण्डः भवितुं शक्नोति। निरन्तरं नियम-उल्लङ्घने 'लायसेंस' निरस्तीकरणस्य अपि प्रबन्धः अस्ति। एतेषां उपकरणानां आयुः (Life Span) २० वर्षाणि निर्धारिता अस्ति, तदनन्तरं नूतनतया अनुमतिः स्वीकरणीया भविष्यति।



# संस्कृतविद्यालय- महाविद्यालयशिक्षकसंघस्य उत्तराखण्डस्य निर्वाचनं सम्पन्नम्, डॉ. रामभूषण बिजल्वाण तृतीयवारं प्रदेशाध्यक्षः निर्वाचितः



**हिमसंस्कृतवार्ताः- हरिद्वारम्।** संस्कृतविद्यालय- महाविद्यालय-शिक्षकसंघस्य उत्तराखण्डस्य त्रैवार्षिकनिर्वाचनं मङ्गलवासरे शान्तिपूर्वकं सम्पन्नम्। अध्यक्षपदे डॉ. रामभूषण बिजल्वाण तथा महामन्त्रीपदे डॉ. कुलदीप पन्तः निर्विरोधं निर्वाचितः। अन्येषु पदेषु प्रदेशसंयोजकः सजीन्द्र नौटियालः, उपाध्यक्षः प्रकाश नैलवालः, संयुक्तमन्त्री प्रदीप पुरोहितः, संगठनमन्त्री कैलाश सेमवालः, प्रदेशसंरक्षकौ कृष्णा उनियालः, राजेन्द्र पुनेठा, लेखापरीक्षकः विद्यासागर व्यासः च निर्विरोधं निर्वाचिताः। २० मार्चमासीये घोषितायां निर्वाचनाचारसंहितायां अधीने मार्चमासीये २९ दिनांके नामाङ्कनप्रक्रिया, ३० मार्चीये नामप्रत्यर्पणस्य प्रक्रिया सम्पन्ना। अस्मिन् वर्षे सर्वेषु पदेषु निर्विरोधं निर्वाचनं जातम्, येन संगठनस्य एकतायाः सन्देशः प्रदत्तः। नवनिर्वाचितः अध्यक्षः डॉ. बिजल्वाण शिक्षकेभ्यः संस्कृत-विद्यालयमहाविद्यालयानां समस्याः शीघ्रं समाधातुं प्रतिबद्धतां व्यक्तवान्। उल्लेखनीयं यत् सः निरन्तरं तृतीयवारं प्रदेशाध्यक्षः अभवत्, यदा तु डॉ. कुलदीप-पन्त द्वितीयवारं महामन्त्री निर्वाचितः। चमोली, रुद्रप्रयाग, टिहरी इत्यादिभ्यः विभिन्नजन-पदेभ्यः बहवः शिक्षकाः जयभारत-साधु संस्कृत-महा-विद्यालये हरिद्वारे आयोजिते कार्यक्रमे सहभागिनोऽभवन्।शपथग्रहण-समारोहे दिवाकर थपलियालो, नवीन सेमवालः, शेषनारायण भट्टो, द्रवेश्वर थपलियालो, नित्यानन्द पोखरियालः, चन्द्रभूषण शुक्लस्तथा जनार्दन नौटियालः इत्यादयः बहवः गणमान्य-शिक्षकाः उपस्थिताः आसन्।

# ब्रिटेन-प्रधानमन्त्रिणः घोषणा-: पश्चिम-एशिया-सङ्घर्षः असमाकं युद्धं नास्ति



लन्दनम्। ब्रिटेन-देशस्य प्रधानमन्त्री कीर-स्टार्मर-महोदयः बुधवासरे पश्चिम-एशिया-क्षेत्रे प्रचलिते सङ्घर्षे स्वस्थितिं स्पष्टीकुर्वन् अकथयत् यत् इदं ब्रिटेन-देशस्य युद्धं नास्ति, अतः देशः अस्मिन् सम्मिलितः न भविष्यति। सः 'होर्मुज-जलडमरूमध्यस्य' (Strait of Hormuz) पुनः उद्घाटनस्य आवश्यकतायाम् अपि बलं दत्तवान्।

स्टार्मर-महोदयः अवदत्, "इदं न अस्माकं युद्धम्। वयं अस्मिन् सङ्घर्षे न पतिष्यामः। इदं अस्माकं राष्ट्रियहिताय नास्ति।" सः उल्लिखितवान् यत् पश्चिम-एशियायाः एषः सङ्घर्षः अधुना द्वितीयं मासं प्रविष्टवान्, यदर्थं सर्वकारः त्वरितपदानि गृह्णाति। ब्रिटेन-देशस्य प्राथमिकता तनावस्य न्यूनीकरणं तथा च क्षेत्रस्य महत्वपूर्ण-ऊर्जा-मार्गस्य (होर्मुज-जलडमरूमध्यस्य) पुनः सञ्चालनं वर्तते। प्रधानमन्त्रिणा उक्तं यत्, "ब्रिटेन-देशे जीवनयापनस्य व्ययं नियन्त्रयितुं प्रभावकारी मार्गः अस्ति खाड़ी-क्षेत्रे शान्तिः सामुद्रिकसुरक्षा च।"

प्रधानमन्त्रिणा सूचितं यत् ब्रिटेन-देशः अस्मिन् सप्ताहे होर्मुज-जलडमरूमध्य-विषये चर्चार्थं बहुपक्षीय-उपवेशनस्य आयोजनं कर्तुं सज्जः अस्ति। सः अवदत् यत् विदेशसचिवः वित्तमन्त्री च जी-७ (G-7) देशानां समकक्षैः सह वार्तालापं कृतवन्तः, रक्षा सचिवः च पश्चिम-एशियायाः मित्रदेशैः सह परामर्शं कृतवान्। ब्रिटेन-देशः ३५ देशैः सह मिलित्वा सामुद्रिकसुरक्षां वर्धयितुं संयुक्तं वक्तव्यं जारीकृतवान्। अस्य सप्ताहस्य अन्ते आयोज्यमाने उपवेशने नौवहनस्य स्वतन्त्रतां पुनः प्राप्तुं, रुद्धानां जहाजानां नाविकानं च सुरक्षां निश्चितं कर्तुं तथा च अत्यावश्यकवस्तूनां आपूर्तिं पुनः आरब्धुं उपायेषु चर्चा भविष्यति।

# भारतीयभाषासु ए.आई. (AI) पाठ्यक्रमस्य प्रवर्तनम्-: शिक्षामन्त्रिणः आह्वानम्




नवदेहली। शिक्षामन्त्री धर्मेन्द्रप्रधानः राष्ट्रियशिक्षानीतेः (NEP) दृष्टिकोणानुसारं 'कम्प्यूटेशनल थिंकिंग' (CT) तथा च 'आर्टिफिशियल इंटेलिजेंस' (AI) इति विषयद्वयं भारतीयभाषासु प्रवर्तयितुम् आह्वानं कृतवान्। नवदिल्ल्यां तृतीयकक्षातः अष्टमकक्षापर्यन्तं 'सी.टी.' तथा 'ए.आई.' इति पाठ्यक्रमस्य शुभारम्भं कुर्वन् शिक्षामन्त्री अवदत् यत् यद्यपि अयं पाठ्यक्रमः आङ्ग्लभाषायां वर्तते, तथापि स्थानीयभाषासु अस्य प्रस्तुतिः अनिवार्या अस्ति।

श्रीप्रधानः उक्तवान् यत् भारते बौद्धिकविविधतायाः तथा ज्ञानस्य प्रभावीकरणस्य सामर्थ्यात् नूतनविषयान् आत्मसात्कर्तुं तीव्रा क्षमता वर्तते। सः भारतस्य ऐतिहासिकबौद्धिकपरम्परायाः उल्लेखं कुर्वन् आर्यभट्ट-माधवसदृशानां गणितज्ञानां स्मरणं कृतवान्, यैः स्वमातृभाषासु एव मौलिकविचाराः प्रस्तुताः। सः अवदत् यत् एषा उत्तराधिकारिणी परम्परा क्षेत्रीयभाषासु 'ए.आई.' सदृश-आधुनिकज्ञानप्रणालीनां लोकतन्त्रीकरणस्य आवश्यकतां सुदृढीकरोति। शिक्षामन्त्री राष्ट्रिय-शैक्षिक-अनुसन्धान-प्रशिक्षण-परिषदं (NCERT) राज्यनिकायैः सह समन्वयम् अवाप्य अस्मिन्नेव शैक्षणिकवर्षे सर्वासु भाषासु पाठ्यक्रमस्य अनुवादं कार्यान्वयनं च कर्तुं निर्देशितवान्।शिक्षाराज्यमन्त्री जयन्तचौधरी अवदत् यत् नवनिर्मितः 'सी.टी.' तथा 'ए.आई.' पाठ्यक्रमः देशभरस्य सी.बी.एस.ई. (CBSE) विद्यालयेषु प्रवर्तयिष्यते। सः उक्तवान् यत् एषा पहलः राष्ट्रियशिक्षानीतेः अभिनवशिक्षणपद्धतीनां तथा च उदयमानतन्त्राणां (Emerging Technologies) प्रारम्भिकपरिचयेन सह सङ्गतम् अस्ति।

केन्द्रीयमाध्यमिकशिक्षाबोर्ड् (CBSE) द्वारा विकसितस्य अस्य पाठ्यक्रमस्य मुख्योद्देश्यं तृतीयकक्षातः अष्टमकक्षापर्यन्तं छात्रान् आधारभूत-अङ्कीय (Digital) तथा विश्लेषणात्मक-कौशलैः सह परिचितं कारयितुं, विद्यालयीशिक्षायां प्रारम्भिकस्तरे एव आधुनिकतन्त्राणां समावेशं च अस्ति।

# प्रवेश-करस्य (Entry Tax) नूतन-दराणां विरोधः-: बी.बी.एन. औद्योगिक-क्षेत्रे चक्रं स्थगनम्

बद्दी। 'प्रवेश-करस्य' (Entry Tax) नूतनाः दराः प्रवर्तमानेन एव बद्दी-बरोटीवाला-नालागढ़ (BBN) औद्योगिक-क्षेत्रे तादृशः कोलाहलः उत्पन्नः यत् प्रथमदिने एव उद्योगानां चक्राणि अवरुद्धानि, सम्पूर्णं क्षेत्रं च 'यातायात-अवरोधपाशेन बद्धम् अभवत्। सीमासु व्याप्तेन विरोधेन चक्रस्थगनेन च कतिपयासु घण्टासु एव उद्योगानां गतिः रुद्धा। कर्मचारिणः मार्गेषु निमज्जिता, उत्पादनं ठप्पम् अभवत्, सहस्रशः टन-परिमितं सज्जं वस्तु (Finished Goods) यन्त्रागाराणां द्वारेषु एव अटकितम्।

प्रथमदिने एव कोटिशः रूप्यकाणां हानिः अभवत्, आपूर्ति-शृङ्खला (Supply Chain) च पूर्णतः विशीर्णा जाता।

**"लौकिकन्यायकोशः"**

**"तमोदीपन्यायः"**

यथा दीपः तमो नाशयति तथा ज्ञानम् अज्ञानं दूरीकरोति इति।

**अज्ञानं ज्ञातुमिच्छेद्यो मानेन अत्यन्तमूढधीः।**
**स तु नूनं तमः पश्येद् दीपोनोत्तमतेजसा।** {वेदान्तसिद्धान्तमुक्तावली}

डा. वर्षा प्रकाश टोणगांवकर
पुणे / महाराष्ट्रम्

# संस्कृतं मधुरं सदा -२०





हिमसंस्कृतवार्ता
असमप्रदेशीयः
विज्ञानशिक्षकः, नारदोपाध्यायः

प्रेम विना न किमपि कर्म सिध्यति लोके । सर्वेषु क्षेत्रेषु प्रेम हि अपेक्ष्यते वास्तविकैः सज्जनपुरुषैः। ईश्वरोऽपि प्रेमाधीनः। अहिंसाभावतः हि प्रेम्णः उद्रेकः भवति । वस्तुतः धर्मः इत्युक्ते नान्यत्किमपि वस्तु, अपितु तत् केवलं निष्कामप्रेम एव । प्रकृतिप्रेम, जीवप्रेम, भगवत्प्रेम इत्यादिकं हि धर्मस्वरूपम् । प्रेमातिरिच्य नान्यः कोऽपि द्वितीयधर्मः वर्तते जगति । प्रेम हि धर्मस्य मूलम् । प्रेमविहीनं धर्मः, अधर्मः हि । अहिंसा हि परमः धर्मः उच्यते । अन्तःकरणे यावत् निष्कामप्रेमभावः न स्फुरति, तावत् घोरतपश्चरणेन अपि जीवने न किमपि सिद्ध्यति । एकेन लघुप्रसङ्गेन अस्य भावस्य पुष्टीक्रियते अत्र ।

नारदपुराणे कयोश्चन दम्पत्योः एकः प्रसङ्गः आयाति । पतिः प्रतिदिनम् आखेटे रतः । सः वने विचरतः बहून् पशून् हतवान् । पत्युः अनेन पशुहिंसाजन्येन कार्येण पत्नी नितरां खिन्ना अभवत् । सा धर्मपरायणा, सुशीला च नारी आसीत् । तस्यै पतिकार्यं सर्वथा नारोचत । तस्मात् सा अहिंसावृत्ति धारणाय नानाज्ञानसम्बद्धेन वचनेन तमुद्दिश्य प्रबोधयितुम् आरब्धवती ।

स्वामिन् ! एतेषां निर्बोधपशूनां हिंसां परित्यज्य भगवतः जनार्दनस्य आराधना क्रियतां, प्रेम आचर्यताम् । पशुहिंसाकार्यं न कदापि न्यायोचितं कार्यं भवितुमर्हेत् जगति, अपितु अनेन अपराधकार्येण परिणामे नरकयातना हि भोक्तव्या भवेत् भवता । अतः इतः परं केवलं भगवद्भजनं क्रियताम् । पुराणेषु कथ्यमानमस्ति यत् 'अहिंसा परमो धर्मः' इति । यः हिंसायां प्रवृत्तः भवति, तस्य समस्त-धर्मः निरर्थकः भवति ।

स्वामिन् ! हिंसावृत्तयः विविधप्रकारकाः भवन्ति। विद्वद्भिः जीवहिंसा षड्विधा उक्ता । प्रथमः हिंसकः सः, यः हिंसार्थम् अनुमोदनं करोति । एवं द्वितीयः, यः प्राणिनं हन्ति । तृतीयः, यः विश्वासम् उत्पाद्य प्राणिनं मृत्युजाले पातयति । चतुर्थः, यः मृतप्राणिनः मांसं भुङ्क्ते । पञ्चमः, यः मांसं पक्त्वा प्रस्तौति । तथैव षष्ठः हिंसकः सः, यः तन्मांसं खादनाय परिवेषयति चेति । एते सर्वेऽपि हिंसकाः स्युः । विद्वान् पुरुषः सर्वदा हि हिंसायुक्तं धर्मम् अधर्मं हि कथयति । मनुष्यस्य दयाभावः हि श्रेष्ठः । अत एवाहं भवतः हितार्थं हि वारं वारं पशुहिंसाकार्यं त्यक्तुं भवन्तं बोधयन्त्यस्मि । अतः तत्कार्यं सर्वथा परित्यज्यताम्, एवञ्च सप्रीति पशवः कृपया रक्ष्यन्ताम् इति । सर्वान् प्रति प्रेमदृष्ट्या पश्यतु, आचरतु च । अयमेव स्वधर्मः नाम । हिंसकाय परमदेवः सदैव क्रुध्यति, न वा कदापि तुष्यति । अतः सर्वधर्मान् परित्यज्य प्रेमभावः अङ्गीक्रियतां स्वामिन् !

वस्तुतः नारी लक्ष्मीस्वरूपिणी भवति । तस्याः प्रबोधनेन पतिः अचिरेण सर्वविधहिंसातः निवृत्तः अभवत्, भगवद्भजने च प्रवृतः जातः । एवं यदि हिंसाभावं परित्यज्य जगतः सर्वान् प्रति प्रेमाचरणस्य अभ्यासः क्रियते तर्हि शनैः इदं जगत् हि प्रेममयं, प्रेमस्वरूपं वा परिलक्ष्यते । सः प्रेमस्वरूपः नान्यः कोऽपि, अपितु स्वधर्मरूपः, साक्षात् श्रीपरमेश्वरः हि वर्तते इति, शुभम् ।



हिमसंस्कृतवार्ताः, ईदरधीरजः, हैदराबादः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं करोमि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। अद्य काः विचित्राः वार्ताः त्वया श्रुताः?

**नन्दिनी-** प्रथमं तु, एकेन युवकेन तस्य विद्युन्मुद्रा- सम्पत्तिः अन्तर्जाले प्रदर्शिता। सा सम्पत्तिः कोटि- रूप्यकात्मका इति जनैः चिन्तितम्। सा तु केवलं चित्ररूपा प्रतिकृतिः एव विश्वविद्यालयस्य कार्यार्थं तेन रचिता। तस्य वास्तविकं धनं केवलं पञ्चाशदधिक-चतुश्शतं रूप्यकाणि एव इति तेन प्रकाशितम्।

**काव्या-** हा हा! अतीव हास्यजनकं खलु एतत्। एका भ्रान्तिः एव जनेषु उत्पन्ना। अन्या वार्ता का?

**नन्दिनी-** एकं कृत्रिमबुद्धियन्त्रं वैज्ञानिकैः परीक्षितम्। यन्त्रेण एकस्य अपराधिनः तथा एकस्य हिमपशोः जीवनयोः मध्ये चयनं कृतम्। यन्त्रेण पशोः जीवनं रक्षितम्, अपराधिनः जीवनं च त्यक्तम्।

**काव्या-** अहो! यन्त्रेण कृतः अयं निर्णयः अतीव विस्मयकरः। यन्त्राणि अपि न्याय-निर्णयं कुर्वन्ति इति अद्भुतम्। अपरा का वार्ता त्वया पठिता?

**नन्दिनी-** आङ्ग्लदेशे एकस्याः महिलायाः एकः शिशुः जातः। तस्याः महिलायाः सम्बन्धः यमल- भ्रातृभ्यां सह आसीत्। शिशोः जनकः कः इति ज्ञातुं वैद्याः आनुवंशिक-परीक्षणं कृतवन्तः सन्ति। परन्तु तौ भ्रातरौ समानौ स्तः, अतः पितुः निश्चयः वैद्यैः न प्राप्तः।

**काव्या-** विज्ञानस्य अपि एतादृशी सीमा अस्ति इति मया न चिन्तितम्। इदानीम् अन्तिमा वार्ता का इति कृपया वद।

**नन्दिनी-** केरलराज्ये एकस्मिन् मन्दिरे भक्तेन एकं विशिष्टं कार्यं कृतम्। देवस्य मातापितरौ भवितुम् एका मूल्यख्यापनस्पर्धा मन्दिरेण आयोजिता। एकः परिवारः पञ्चविंशति-लक्ष-रूप्यकाणि दत्तवान् अस्ति। तस्य परिवारस्य जनैः तत्र सर्वोच्च-मूल्यं दत्तम्।

**काव्या-** देवे एतादृशी भक्तिः उत्तमा। अद्यतन्यः वार्ताः बहु रोचकाः। धन्यवादः।

# जनगणना-२०२७: राष्ट्रपति-उपराष्ट्रपतिभ्यां 'स्व-गणना' उपक्रमस्य शुभारम्भः





नवदेहली। राष्ट्रपतिः द्रौपदी मुर्मु महोदया राष्ट्रपतिभवने 'जनगणना-२०२७' इत्यस्य कृते सर्वकारस्य 'स्व-गणना' (Self-Enumeration) इति उपक्रमे भागं गृहीतवती। गृहसचिवस्य गोविन्दमोहनस्य, पञ्जीयक-महानिदेशकस्य (Registrar General) तथा जनगणना-आयुक्तस्य मृत्युञ्जयकुमारनारायणस्य अन्येषां च वरिष्ठाधिकारिणां उपस्थितौ राष्ट्रपतिमहोदया पोर्टल-माध्यमेन स्वपरिवारस्य विवरणं स्वयं अङ्कितवती।उपराष्ट्रपतिः सी. पी. राधाकृष्णन् महोदयः अपि अद्य उपराष्ट्रपतिभवने जनगणना-२०२७ इत्यस्य कृते 'ऑनलाइन' स्व-गणना-प्रपत्रं पूरितवान्। सामाजिक-सञ्चार-माध्यमेन (Social Media) उपराष्ट्रपतिः सर्वान् निवासिनः प्रोत्साहितवान् यत् ते स्व-स्व राज्येन वा केन्द्रशासितप्रदेशेन वा अधिसूचित-अवधौ आधिकारिक-वेब-पोर्टल (https://se.census.gov.in/) माध्यमेन स्वपरिवारस्य विवरणं प्रदाय स्व-गणना-प्रक्रियायां सहयोगं कुर्वन्तु।उपराष्ट्रपतिणा सूचितं यत् सर्वकारस्य 'डिजिटल इण्डिया' उपक्रमस्य अनुरूपं जनगणना-२०२७ मध्ये तथ्यानां (Data) सङ्ग्रहस्य, प्रसारस्य च गुणवत्तां, दक्षतां, समयबद्धतां च वर्धयितुं व्यापक-अङ्कीय-प्रौद्योगिकीनां प्रयोगः कृतः अस्ति। गणना-प्रक्रियायाः समये भारतस्य पञ्जीयक-महानिदेशकः तथा जनगणना-आयुक्तः मृत्युञ्जयकुमारनारायणः उपस्थितः आसीत्।

# हास-परिहासम् 😳 😳 😳 😳

**पतिः-** नवरात्राः आगमिष्यन्ति। अहं तुभ्यं नववर्णीयाः शाटिकाः क्रीत्वा दास्यामि, प्रतिदिनं परिवर्तितं कृत्वा धारयतु।

**पत्नी-** अहो! अहम् अतीव प्रसन्ना अस्मि। चलतु चलतु।

**पतिः-** ततः परं "करवाचौथ" पर्व अपि आगमिष्यति, तदर्थम् अपि एका शाटिका क्रीणातु।

**पत्नी-** मम प्रसन्नतायाः सीमा एव नास्ति! धन्यवादः ❣️

पतिः:- ततः परं दीपावली अपि आगमिष्यति, अतः नूतनतमं "iPhone" यन्त्रम् अपि स्वीकुरु।

**पत्नी-** अतिप्रसन्नतायाः कारणेन अहं मरिष्यामि 😍 😍

**पतिः-** हम्? अस्तु तर्हि सर्वं निरस्तम्! अहं त्वां विना जीवितुं न शक्नोमि।

**पत्नी-** 😳 😳 😳 😳 😳 😠 😠 😠 🥵 🥵 🥵

**पतिः** (एकान्ते)- 😎 😎 😎